य: पठेत् साधकश्रेष्ठो गाणपत्यं लभेत स: ॥
स्तवस्यास्य प्रसादेन योगी योगित्वमाप्नुयात् ।
राज्यार्थिनां भवेद्राज्यं भोगिनां भोग एव च ॥
साधूनां साधनं देव ! कौलिकानां कुलं भवेत् ।
यं यं कामयते मन्त्री तं तमाप्नोति लीलया ॥
बाणलिङ्गप्रसादेन सर्व्वमाप्नोति सत्वरम् ।
किमन्यत् कथयामीह सर्व्वं वेत्सि कुलेश्वर ! ।
महाभये समुत्पन्ने राजद्वारे कुलेश्वर ! ॥
देशान्तरभये प्राप्ते दस्युचौरादिसङ्कुले ।
पठनात् स्तवराजस्य न भयं लभते क्वचित् ॥
बाणलिङ्गस्य माहात्म्यं संक्षेपात् कथितं मया ।
तस्य श्रवणमात्रेण नरो मोक्षमवाप्नुयात् ॥
बाणलिङ्गं सदाराध्यं योगिनां योगसाधने ।
कौलिकानां कुलाचारे पशूनां प्रभुनिग्रहे ॥
वेदज्ञानां वेदपाठे रोगिणां रोगनाशने ।
यो यो नाराधयेदेनं सर्व्वं तन्निष्फलं भवेत् ॥"

इति श्रीयोगसारे सर्व्वागमोत्तमे पार्व्वतीशिवसंवादे बाणलिङ्गस्तोत्रं समाप्तम् ॥

बा(वा)णवार:, पुं, (बाणं परमुक्तशरं वारयतीति । वृ + णिच् + अण् ।) भटादेश्चोलाकृतिसन्नाह: । तत्पर्य्याय: । वारबाण: २ वारण: ३ । इति शब्दरत्नावली ॥ चोलक: ४ । इति हारावली । १६७ ॥ (क्लीवेऽपि दृश्यते । यथा, सुश्रुते । ४ । २४ ।
"बाणवारं स्वनावर्त्तेजोबलविवर्द्धनम् ॥")

बा(वा)णसुता, स्त्री, (बाणस्य बाणासुरस्य सुता ।) ऊषा । इति शब्दरत्नावली ॥

बा(वा)णहा, [न्] पुं, (बाणं बाणासुरं हन्तीति । हन् + क्विप् ।) विष्णु: । इति हेमचन्द्र: ॥

बा(वा)णा, स्त्री, पुं, (वण्यते शब्द्यते इति । वण + घञ् । टाप् ।) नीलझिण्टी । इत्यमर: । २ । ४ । ७४ ॥

बा(वा)णा, स्त्री, बाणमूलम् । इति मेदिनी । णे, २७ ॥

बा(वा)णारि:, पुं, (बाणस्य बाणासुरस्य अरि: ।) विष्णु: । इति केचित् ॥

बा(वा)णाश्रय:, पुं, (बाणस्याश्रय: ।) धनु: । इति हलायुध: ॥

बा(वा)णासनं, क्ली, (बाणस्य आसनम् ।) धनु: । इति हलायुध: ॥

बा(वा)णिज:, पुं, (वणिगेव । वणिज् + अण् ।) वणिक् । इत्यमर: ॥ वाड़वाग्नि: । इति त्रिकाण्डशेष: ॥

बा(वा)णिजिक:, पुं, (वणिगेव । वणिज् + ठञ् ।) वाड़वाग्नि: । वणिक् । इति मेदिनी ॥ (वाणिजकोऽप्यत्र । यथा, मनु: । ३ । १८१ ।
"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥")
धूर्त्त: । इति शब्दरत्नावली ॥

बा(वा)णिज्यं, क्ली, (वणिजो भाव: कर्म्म वा । वणिज् + ष्यञ् ।) वैश्यवृत्तिभेद: । इत्यमर: ॥ वणिज: कर्म्म भावो वा । वाणिज्येत्यपि दृश्यते । इति भरत: ॥ तत्पर्य्याय: । सत्यानृतम् २ वाणिज्या ३ वणिक्पथ: ४ । इति जटाधर: ॥ (यथा, मार्कण्डेये । ५१ । ५४ ।
"कृष्यां वाणिज्यलाभे च शान्तिं कुर्व्वन्तु मे सदा ॥")
क्रयविक्रयरूपस्य तस्य विवरणादि यथा,—
"मानेन तुलया वापि योऽंशमष्टमकं हरेत् ।
दण्डं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम् ॥"
य: पुनर्वणिक् व्रीहिकार्पासादे: पण्यस्याष्टमभागं कूटमानेन कूटतुलया वान्यथापहरत्यसौ पणानां द्विशतं दण्डनीय: । अपहृतस्य पुनर्द्रव्यस्य वृद्धौ हानौ च दण्डस्यापि वृद्धिहानी कल्प्ये ॥
"भेषजस्नेहलवणगन्धधान्यगुड़ादिषु ।
पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोड़श ॥"
भेषजमौषधद्रव्यं स्नेहो घृतादि: गन्धद्रव्यमुशीरादि आदिशब्दाद्धिङ्गुमरिचादि । एतेष्वसारद्रव्यं विक्रयार्थं मिश्रयत: षोड़शपणो दण्ड: ॥
किञ्च ।
"मृच्चर्म्ममणिसूत्रायःकाष्ठवल्कलवाससाम् ।
अजातौ जातिकरणे विक्रेयाष्टगुणो दम: ॥"
न विद्यते बहुमूल्या जातिर्यस्मिन् मृच्चर्म्मादिके तदजाति: तस्मिन् जातिकरणे विक्रयार्थं गन्धवर्णरसान्तरसञ्चारणेन बहुमूल्यजातीयसादृश्यसम्पादने यथा मल्लिकामोदसञ्चारणेन मृत्तिकायां सुगन्धामलकमिति । मार्जारचर्म्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्म्मेति स्फटिकमणौ वर्णान्तरकरणेन पद्मराग इति कार्पासिके सूत्रे गुणोत्कर्षाधानेन पट्टसूत्रमिति कालायसे वर्णोत्कर्षाधानेन रजतमिति बिल्वकाष्ठे चन्दनामोदसञ्चारणेन चन्दनमिति कक्कोले त्वगाख्ये लवङ्गमिति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितस्य दृश्यमृच्चर्म्मादे: पण्यस्याष्टगुणो दण्डो वेदितव्य: ॥
"समुद्गपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम् ।
आधानं विक्रयं वापि नयतो दण्डकल्पना ॥
भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते ।
द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान् ॥"
मुद्गं पिधानं मुद्गेन सह वर्त्तत इति समुद्गं करण्डकम् । परिवर्त्तनं व्यत्यास: । योऽन्यदेव मुक्तानां पूर्णं करण्डकं दर्शयित्वा कृतलाघवेनान्यदेव स्फटिकानां पूर्णकरण्डकं समर्पयति यश्च सारं भाण्डं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दण्डकल्पना वक्ष्यमाणा वेदितव्या । कृत्रिमकस्तूरिकादेर्मूल्यभूते पणे भिन्ने न्यूने न्यूनपणमूल्यमिति । यावत्स्मिन् कृत्रिमे विक्रीयते पञ्चाशत्पणो दण्ड: पणमूल्ये पुन: शतं द्विपणमूल्ये द्विशतो दण्ड इत्येवं मूल्यवृद्धौ दण्डवृद्धिरूह्या ॥ * ॥ वणिज: प्रत्याह ।
"सम्भूय कुर्व्वतामर्घं सबाधं कारुशिल्पिनाम् ।
अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तम: ॥"
राजनिरूपितार्घस्य ह्रासं वृद्धिं वा जानन्तोऽपि वणिज: सम्भूय मिलित्वा कारूणां रजकादीनां शिल्पिनां चित्रकरादीनां सबाधं पीड़ाकरमर्घान्तरं लाभलोभात् कुर्व्वन्त: पणसहस्रं दण्डनीया: ॥ * ॥ किञ्च ।
"सम्भूय वणिजां पण्यमनर्घेणोपरुन्धताम् ।
विक्रीणतां वा विहितो दण्ड उत्तमसाहस: ॥"
ये पुनर्वणिजो मिलित्वा देशान्तरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुन्धन्ति महार्घेण वा विक्रीणते तेषामुत्तमसाहसो विहितो दण्डो मन्वादिभि: ॥ * ॥ केन पुनरर्घेण पणितव्यमित्याह ।
"राजनि स्थाप्यते योऽर्घ: प्रत्यहं तेन विक्रय: ।
क्रयो वा निस्रवस्तस्माद्वणिजां लाभकृत् स्मृत: ॥"
राजनि सन्निहिते सति यस्तेनार्घ: स्थाप्यते निरूप्यते तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्य्य: । निर्गत: स्रवो निस्रवोऽवशेष: तस्माद्राजनिरूपितादर्घो निस्रव: स एव वणिजां लाभकारी न पुन: स्वच्छन्दपरिकल्पितात् । मनुना चार्घ्यकरणे विशेषो दर्शित: ।
"पञ्चरात्रे पञ्चरात्रे पक्षे मासे तथा गते ।
कुर्व्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृप ! ॥"
इति ।
किञ्च ।
"स्वदेशपण्ये च शतं वणिक् गृह्णीत पञ्चकम् ।
दशकं पारदेश्ये तु य: सद्य: क्रयविक्रयी ॥"
स्वदेशप्राप्तपण्यं गृहीत्वा यो विक्रीणीतेऽसौ पञ्चकं शतं पणशते पणपञ्चकं लाभं गृह्णीयात् । परदेशप्राप्ते पुन: पण्ये शतपणमूल्ये दशपणान् लाभं गृह्णीयात् । यस्य पण्यग्रहणदिवस एव विक्रय: सम्पद्यते । य: पुन: कालान्तरेऽपि विक्रीणीते तस्य कालोत्कर्षवशाल्लाभोत्कर्ष: कल्प्य: । एवञ्च यथार्घे निरूपिते पणशते पञ्चपणो लाभो भवति तथैवार्घो राज्ञा स्वदेशपण्यविषये स्थापनीय: ॥ * ॥ परदेशपण्ये अर्घनिरूपणप्रकारमाह ।
"पण्यस्योपरि संस्थाप्य व्ययं पण्यसमुद्भवम् ।
अर्घोऽनुग्रहकृत् कार्य्य: क्रेतुर्विक्रेतुरेव च ॥"
देशान्तरादागते पण्ये देशान्तरगमनप्रत्यागमनभाण्डग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोऽर्थस्तावन्तमर्थं परिगणय्य पण्यमूल्येन सह मेलयित्वा यथा पणशते दशपणो लाभ: सम्पद्यते तथा क्रेतृविक्रेत्रोरनुग्रहकार्य्योऽर्घो राज्ञा स्थापनीय: ॥ * ॥ प्रासङ्गिकं परिसमाप्याधुना विक्रीयासम्प्रदानम्प्रक्रमते । तत्स्वरूपं नारदेनाभिहितम् ।
"विक्रीय पण्यं मूल्येन क्रेतुर्यन्न प्रदीयते ।
विक्रीयासम्प्रदानं तद्विवादपदमुच्यते ॥"
तत्र विक्रेयद्रव्यस्य चराचरभेदेन द्वैविध्यमभिधाय पुन: षड़्विधत्वं तेनैव प्रत्यपादि ।
"लोकेऽस्मिन् द्विविधं पण्यं जङ्गमं स्थावरं तथा ।